
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M158 विषय वैदिक
नाव. हिरण्यकेशीय दर्शपूर्णमास प्रयोग Mss
लेखक/लिपीकार वासुदेव बापट
पृष्ठ 52 काळ शके 1746 पूर्ण/अपूर्ण

हि० दर्श० पू०

१

श्रीगणेशायनमः अथदर्शपूर्णमासप्रयोगः। यजमानः प्रातरग्निहोत्रानंतरं शुक्लपक्ष (पौर्णमास्यां)
केशान्स्वानिवापयित्वा स्नात्वाऽपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान्धारयमाणो यजमानः प
त्न्यासह प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं दर्शपूर्णमासाभ्यां यक्ष्येइति
रूपं शुचिरुद्धेः संकल्प्य तत्रेदानीं पौर्णमासेष्ट्या यक्ष्य इत्युक्त्वा। अमावास्यायां तु श्रीपर
मेश्वरप्रीत्यर्थं दर्शेष्ट्या यक्ष्य इत्येव संकल्पः नपूर्वः। अस्यां पौर्णमासेष्ट्यामध्वर्युं त्वामहं
वृणे अध्वर्युं वृणोति अध्वर्युर्भविष्यामीत्युक्त्वा गार्हपत्यादाहवनीयमुद्धृत्य दक्षिणाग्निं
प्रणीयाहवनीयं प्रणयति ममाग्ने वर्चो विहवेष्वस्त्वित्युक्त्वा वयं त्वेंधानास्तन्वं पुषेम मह्यं नमंतां
प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम आहवनीयमन्वादधाति यजमानोध्वर्युश्चा

शिवो

१

यजमानः अग्निं गृह्णामि सुरथं यो मयोभूर्य उद्यंतमारोहति सूर्यमह्ने आदित्यं ज्योतिषां
ज्योतिरुत्तमं श्वो यज्ञाय रमतां देवताभ्यः वसून्रुद्रानादित्यानिंद्रेण सह देवताः। ताः पूर्वः
परिगृह्णामि स्व आयतने मनीषया इमामूर्जं पंचदशीं ये प्रविष्टास्तान्देवान्परिगृह्णामि पू
र्वः अग्निर्हव्यवाडिह तानावहतु पौर्णमासं हविरिदमेषां मयि इति पौर्णमास्यां।
आमावास्यं हविरिदमेषां मयि इत्यमावास्यायामाहवनीयेन्वाधीयमाने जपति अंत
राग्नी पशवो देवसंसदमागमन् तान्पूर्वः परिगृह्णामि स्व आयतने मनीषया अंतरा
ग्नीति इत्यनुजपति अध्वर्युः मम देवा विहवे संतु सर्व इंद्रावंतो मरुतो विष्णुरग्निः ममांतरिक्ष
मुरुगोपमस्तु मह्यं वातः पवतां कामे अस्मिन् गार्हपत्यमन्वादधाति यजमानोध्वर्युश्च

छ्रि० द०

२

इह प्रजा विश्वरूपा रमंतामग्निं गृहपतिमभिसंवसानाः। ताः पूर्वः परिगृह्णामि स्व आयतने मनीषया। इह प
शवो विश्वरूपा रमंतामग्निं गृहपतिमभिसंवसानाः। तान्पूर्वः परिगृह्णामि स्व आयतने मनीषया। गा
र्हपत्ये न्वाधीयमाने यजमानो जपति अध्वर्युः मयि दिवाद्र विश्णमायजं तामय्यान्वीरस्तु मयि देव हू
तिः दैव्या होतारा वनिषंत पूर्वे रिष्टाः स्याम तनुवा सुवीराः दक्षिणाग्निमन्वादधाति यजमानो ध्वर्यु
श्च अयं पितृणामग्निरवाड्ढव्या पितृभ्य आ तं पूर्वः परिगृह्णाम्यविषन्नः पितुं करत् दक्षिणा
ग्निमन्वाधीयमाने जपति यजमानः इदमहमग्निज्येष्ठेभ्यो वसुभ्यो यज्ञं प्रब्रवीमीदमहमिंद्रज्ये
ष्ठेभ्यो रुद्रेभ्यो यज्ञं प्रब्रवीमीदमहं वरुणज्येष्ठेभ्य आदित्येभ्यो यज्ञं प्रब्रवीमि अन्वाहितेषु जप
ति अध्वर्युः सान्नाय्ये पलाशशाखां शमीशाखां वाहरति इषे त्वा शाखामाछिनत्ति उपस

शिवो

२

प्रतिष्ठतं मंत्रं तूष्णीं

य ऊर्जे त्वा सन्नमयत्यनुमार्ष्टि वा इमां प्राचीमुदीचीमिषमूर्जमभिसंस्कृतां बहुपर्णामशुष्काग्रां
हरामि पशुपामहं आहरति वायवस्थोपायवस्थ तया षड् वत्सानपाकरोति यजमानः विधृकंदसि
विधृमे पाप्मानमृतात्सत्यमुपैमि मयि श्रद्धा अपउपस्पृश्यापरेणाहवनीयं दक्षिणातिक्रम्य पयस्वती
रोषधयः पयस्वद्वीरुधां पयः अपां पयसो यत्पयस्तेन मामिंद्र संसृज अप आवामति देवाद्वेषुप
राक्रमध्वं प्रथमा द्वितीयेषु द्वितीया तृतीयेषु त्रिरेकादशा इह मावत इदं शाके यं यद्धिदं करोम्या
त्माकरो आत्मन इदं करिष्ये भेषजमिदं मे विश्वभेषजा श्विना प्रावतं युवं देवता उपतिष्ठते समुद्रं म
नसा ध्यायन् सम्राउसि व्रतपा असि व्रतानां व्रतपतिरसि व्रतमारभे तन्मे प्रब्रवीमि तच्छकेयं तेन राके
यं तेन राध्यासं आदित्यमुपतिष्ठते अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां अग्निं वा

न० स

हि० द०

पो॥व्रतपते० वायुं० आदित्य व्रतपते० आदित्यं० व्रतानां व्रतपते० व्रतपतिमुपनिष्क्रमते अध्वर्युः देवो
वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे आप्यायध्वमघ्न्या इंद्राय देवभागमूर्जस्वतीः पयस्वतीः प्र
जावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशंसः गाः प्रस्थापयति महेंद्रायेति महेंद्रयाजिनः
शुद्धा अपः सुप्रपाणे पिबंतीः शतमिंद्राय शरदो दुहानाः रुद्रस्य हेतिः परि वो वृणक्तु प्रस्थिता अ
नुमंत्रयते ध्रुवा अस्मिन्गोपतौ स्यात बह्वीः गृहानवेक्षते यजमानस्य पशून्पाहि अग्न्यागारे पुर
स्तात्प्रतीचीं शाखामुपगूहति अमावास्यायां वेदं कुशावेदिं (करोति) प्रागुत्तरस्मात्परिग्रहात्करोति
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे असिदमादत्ते यज्ञस्य घोषदसि
गार्हपत्यमुपतिष्ठते प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः गार्हपत्ये निष्टपति उर्वन्तरिक्षं प्रेहि प्राचीनमु

प्रदक्षिणं तते । शिवो । २

दीचीनं वाभिप्रव्रजन्नायतः कुतश्चिद्दर्भमयं वर्हिराहरति विष्णोः स्तूपोऽसि अभिप्रेतानामेकं स्तंबमुत्सृ
जति देवानां परिषूतमसि वर्षवृद्धमसि अन्यं परिषौति पशूनां त्वा भागमुत्सृजामि परिषूतस्यैकां दर्भ
दर्भनाड्यावुत्सृजति इदं देवानां परिषूतानभिमृशति इदं पशूनां उत्सृष्टं देवस्य त्वा सवितुः प्रसवे
ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां वर्हिर्देवसदनमारभे विशाखे अभिपद्यते देवेभ्यस्त्वोर्ध्वबर्हिर्भ्यः
ऊर्ध्वमुन्मार्ष्टि देवबर्हिर्मा त्वान्वगाति र्यक्पर्व ते राध्यासं असिदं निदधाति या जाता ओषधयो दे
वेभ्यस्त्रियुगं पुरा तासां पर्व राध्यासं परिस्तरमाहरन् अभिमन्त्र्य आच्छेत्ता ते मा रिषं आच्छिनत्ति
पउपस्तृत्य सनखं मुष्टिं ददाति स प्रस्तरः एवं देवस्य त्वेत्याद्याच्छेत्ता ते मा रिषमिति प्रतिमुष्ट्यावर्त
ते अयुजो युजो वा मुष्टीन् निधनानि वा करोति तूष्णीं परिभोजनीया उपराजीयाश्च देवबर्हिः त्वा

हि०द०

४

तव छत्रं विरोह। आलवानमभिमृशति। सहस्रवल्शा वि वयं रुहेम। आत्मानं प्रत्यभिमन्त्र्याप उपस्पृश्य।
अदित्यै रास्नासि प्रदक्षिणं शुल्वमावेष्ट्य। अयुपिता योनिः प्रतिसंदधाति। त्रिधातु पञ्चधातु वा धा
तो धातो मन्त्रमावर्तयति। पृथिव्याः संपृचः पाहि। आगत्य मुदग्रं वा शुल्वं निदधाति। अपरिमितानां
परिमिताः सन्नह्य सुकृताय कं। एनो मा निगां कतमच्चनाहं पुनरुत्थाय बहुला भवन्तु। बर्हिरभिमन्त्र्य स्फ
संभृतां त्वा संभरामि। शुल्वे निधनानि संभरति। प्रतिनिधनं मन्त्रावृत्तिः। अकुंभितो योनिः। उत्तमे नि
धने प्रस्तरमादधाति। इन्द्राण्यै सन्नहनं। सन्नह्यति। पूषा ते ग्रन्थिं ग्रथ्नातु। प्रदक्षिणं ग्रन्थिमावेष्ट्य
स ते मास्थात् पुरस्तात्। त्सरं च मुपकर्षति। आपुस्त्वामश्विनौ त्वामृषयः सप्त मामृजः। बर्हिः सूर्यस्य र
श्मिभिरुषसां केतुमारभे। बर्हिरारभते। इन्द्रस्य त्वा बाहुभ्यामुद्यच्छे। उद्यच्छते। बृहस्पतेर्मूर्ध्ना हरा शिवो

४

मि। शीर्षन्नधिनिधाय हरति। उर्वन्तरिक्षं वीहि। इत्येव हरति। अदित्याः सद आसीद। परिधिदेशेऽन्तर्वेद्य
न्धः सादयति। अत्र ये पौर्णमास्यां व्रतं विसृजेद्रसीत्यादि व्रतपतये इ स्फ परस्तान्नान्तं। देवंगममसि। आस
न्नमभिमन्त्रयते। अदित्यास्त्वा पृष्ठे सादयामि। गार्हपत्यदेशे उपरि निदधाति। तूष्णीं स्फल्वं रु त्वा प्रा
ग ग्रमुदग्ग्रं वा निदधाति। यत्कृष्णो रूपं कृत्वा प्राविशस्त्वं वनस्पतीन्। ततस्त्वामेकविंशतिधा सं
भरामि सुसंभृता। त्रीन्परिधीन्। त्रिस्रः समिधो यज्ञायुरनुसंचरान्। उपवेषं मेक्षणं धृष्टिं सं
भरामि सुसंभृता। शुल्व इध्मं संभरति। कृष्णोस्याखरेष्ठो देवपुरश्चर सघ्यासं त्वा सन्नह्य
ति। पूषा ते ग्रन्थिं ग्रथ्नातु। प्रादक्षिणं ग्रन्थिमावेष्ट्य। स ते मास्थात् पुरस्तात्। त्सरं च मुपकर्षति। इं
द्रस्य त्वा बाहुभ्यामुद्यच्छे। उद्यच्छति। बृहस्पतेर्मूर्ध्ना हरामि। शीर्षन्नधिनिधाय हरति। अदित्याः

हि० द०त्री०

५

सद्आसीद ।अंतर्वेद्यग्नेर्धनधः सादयति ।अदित्यास्त्वापृष्ठे सादयामि । बर्हिषा सह निदधाति । वेदोसि येन त्वं
देव वेद देवेभ्यो वेदो भवस्तेन मह्यं वेदो भूयाः । दर्भाणां वेदं करोति तृणं प्रादेशेपरिवासयति । इ
ध्मप्रव्रश्चनानि वेदपरिवासनानि च सह निदधाति ।अंतर्वेदि शाखायाः पलाशानि प्रशाखास्तत्र वा
णि मूलतः परिवास्य । उपवेषोसि यज्ञाय त्वां परिवेषमधारयन् । इंद्राय हविः कृण्वंतः शिवः शग्मो
भवासि नः । तमुपवेषं करोति । शाखाग्रहिते यस्य कस्य चिद्यज्ञियकाष्ठस्योपवेषः । त्रिवृद्दर्भमयं प
वित्रं कृत्वा त्रिरस्य लात्रोद्दर्भरया न्प्रादेशसंमितः । यज्ञे पवित्रं पोतृतमं पयो हव्यं करोतु मे मम्
लेन मूलमुपस्पृश्य साग्रं नग्रथिं करोति । वसूनां पवित्रमसीति वा । पर्वणि यजमानः स्वयमग्नि
होत्रं जुहोति । यवागूममावास्यायां सन्नयत स्तस्या उपोषणमातंचनार्थं निदधाति । अध्वर्युः

शिवो

५

उत्तरेण गार्हपत्यं दर्भान्स्तृणीयै

सायं हुतेग्निहोत्रे दूं दूं सान्नाय्यपात्राणि प्रक्षाल्य न्यंचि प्रयुनक्ति अग्निहोत्रहवणीमुखामुपवेषं
शाखापवित्रमभिधानीं निदानं दोहनमपिधानार्थं पात्रमिति । समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ प
वित्रे करोति । पवित्रे स्थो वैष्णवी वायुर्वो मनसा पुनातु । तृणं काष्ठं वा तयोर्या छिनत्ति नन नखेन । अपउपस्पृश्य
भूमो प्राणापानौ यत्तस्यांगानि सर्वशः आप्याययंतौ संचरतां पवित्रे हव्यशोधने । अभिमंत्र्य । विष्णोर्मन
सा पूते स्थः । अद्भिरुन्मार्ष्टि । गां दोहपवित्रे रज्जुं सर्वाणि पात्राणि शुंधत । संप्रेष्यति । अग्निहोत्रहवण्यां प
वित्रां तर्हितायामप आनीय देवो वः सविता पुनातु । अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः । उद
गग्राभ्यां पवित्राभ्यां त्रिरुत्पुनाति । आपो देवीरग्रेपुवो अग्रेगुवो ग्रइममद्य यज्ञं नयताग्रे यज्ञपतिं धत्त युष्मा
निंद्रो वृणीत वृत्रतूर्ये यूयमिंद्रमवृणीध्वं वृत्रतूर्ये प्रोक्षितास्थ । अनुमंत्रयते उत्तानानि पात्राणि द

हि० दर्श०

निरूहणं वा:

हुला। शुंधध्वं दैव्याय कर्मणे देवयज्यायै। त्रिः सर्वाभिरद्भिः प्रोक्षति। एता आचरंति मधुम
द्दुहानाः प्रजावतीर्यशसो विश्वरूपाः॥ बह्वीर्भवंतीरुपजायमाना इह व इंद्रो रमयतु गावः॥
गा आयतीः प्रतीक्षते। धृष्टिरसि ब्रह्म यच्छ। उपवेषमादत्ते। निरूढं जन्यं भयं सह तेन यं
द्विष्मः स्फभ्रत्ताय श्रयध्वं। तेन गार्हपत्यादुदीचोंगारान्निरूह्य। अपस्त्वं सायय ज्ञस्योरव
उपदधाम्यहं पशुभिः सन्नीतं विभ्रत्तामिं द्रायश्टत्तं। मातरिश्वनो घर्मोसि द्यौरसि पृथि
व्यसि विश्वधाया असि परमेण धाम्ना दृंहस्व मा ह्वाः। तेषु कुंभीमधिश्रयति। भृगूणामंगि
रसां तपसा तप्यस्व। अंगारैः परीधे ३ उपसृष्टां मे प्रब्रूतात्। संप्रेष्यति। वसूनां पवित्रम शिवो

६

वसूनां पवित्रमसि शतधारं

सि शतधारं कुंभ्यां प्रागग्रं शाखापवित्रमादधाति उदक्प्रान्तः। अन्वारभ्य वाचं यच्छति धारयन्नास्ते।
अदित्यै रास्नासि। अभिधानीमादत्ते। तूष्णीं निदाने पूषासि। वत्समुपसृजति। विहारं गां चोपरिष्टा स
मंतरेण मा संचारिष्ट। संप्रेष्यति। अय क्ष्मावः प्रजया संसृजामि रायस्पोषेण बहुला भवंतीः। उपसृ
ष्टामनुमंत्रयते। ऊर्जं पयः पिन्वमाना घृतं च जीवो जीवंतीरुप वः सदेयं। उपसन्नां। द्यौश्चेमं यज्ञं पृथिवी
च संदुहातां धाता सोमेन सह वातेन वायुः। यजमानाय द्रविणं दधातु। दुह्यमानां। उत्सं दुहंति कलशं चतु
र्बिलमिडां देवीं मधुमतीं स्वर्विदं। तदिंद्राग्नी जिन्वतं सूनृतावत् तद्यजमानममृतत्वे दधातु।
धाराघोषमनुमंत्रयते। दोग्धा हरति तं पृच्छति। कामधुक्षः प्रणो ब्रूहि महेंद्राय हविरिंद्रियं। गंगा।
यस्यां देवानां मनुष्याणां पयो हितं। गोधुगाचष्टे। सा विश्वायुः प्रत्याह। देवस्त्वा सविता पुनातु व

हि॰ दर्श॰

७

सोपवित्रेणच्छिन्नधारेण स्रुवा कुंभ्यामानयति। एवं पूषासीत्यादि यदन्यसंप्रेषात्तेनोत्तरे दोहयित्वा। यमु
ना। यस्यां देवानां मनुष्याणां पयो हितं सा विश्वव्यचाः। द्वितीयां। यस्यां देवानां मनुष्याणां पयो हितं। सरस्वती
सा विश्वकर्मा। तृतीयां। तिस्रो दोहयित्वा। बहु दुग्धि महेंद्राय देवेभ्यो हव्यमाप्यायतां पुनर्वत्सेभ्यो म
नुष्येभ्यः पुनर्दोहाय कल्पतां। त्रिः संप्रेष्यति। विसृष्टवागनन्वारभ्योत्तरा दोहयति तूष्णीं वा। सर्वा
सु दुग्धासु हुतस्तोको हुतो द्रप्सोऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्यां। विप्रुषोऽनुमंत्रयते।
द्यौश्च॰ सान्नाय्यं दोहनं संक्षाल्य। संपृचध्वमृतावरीरूर्मिणीर्मधुमत्तमा मंद्रा धनस्य सातये।
कुंभ्यामानयति। अपधिलात्तूष्णीकेन सर्पिषाभिघार्य। दृंह गा दृंह गोपतिं मा वो यज्ञपती त्रिवो
रिषत्। कर्षन्निवोद्वासयति। सोमेन त्वातनच्मीन्द्राय दधि। शीतं बुध्नं त्वचादध्मात ७

नक्ति। यज्ञस्य संततिरसि यज्ञस्य त्वा संततिमनु संतनोमि। अग्निहोत्रोच्छेषणमानयति। आपो हविषु जागृथ
यथा देवेषु जागृथ। एवमस्मिन्यज्ञे यजमानाय जागृथ। अपिधानार्थं पात्रमानीय। अदस्तमसि विष्णवे
त्वा यज्ञायापिदधाम्यहं। अद्भिररिक्तेन पात्रेण याः पूताः परिश्रितः। अपिदधाति। यदि मृन्मयं स्यात्तृणं का
ष्ठं वानुप्रविध्येत्। इमौ पर्णं च दर्भं च देवानां हव्यरोधनौ। प्रातर्वेषाय गोपायु। विष्णो हव्यं हि रक्षसि। उ
न्मुच्य शाखापवित्रे प्रस्तात्तं निदधाति। तूष्णीं शाममियं। विष्णो हव्यं रक्षस्व। सान्नाय्यं गार्हपत्यदेशे उपरि
निदधाति। अन्यां शाखामाहृत्य तया दर्भैर्वा प्रातर्दोहाय वत्सानपाकरोति। परिस्तृणीत परिधत्ताग्निं
परिहितोऽग्निर्यजमानं भुनक्तु। अपां रस ओषधीनां सुवर्णो निष्क इमे यजमानस्य संतु कामदुघा अ
मुत्रामुष्मिन्लोके। संप्रेष्यति। उदगग्रैः प्रागग्रैश्च दर्भैरग्नीन् परिस्तृणाति। आहवनीयं परिस्तीर्य गार्ह

हि॰ दर्श पू॰

८

पत्नमथदक्षिणाग्निं। यजमानः। उपावृत्तीरुपस्तृणुते देवता उपवसंतु मे अहं ग्राम्यानुपवसामि मह्यं गो
पतये पशून् सायंपरिस्तीर्यमाणेष्वजपति एतत्कालोपवसत्यमावास्यायां पौर्णमास्यां तु पूर्वेद्युरग्न्य
न्वाधानमग्निपरिस्तरणं श्वो मन्तेऽध्मावर्हिर्वेदं च करोति सद्यो वा सर्वं करोति सद्यस्कालायामुपरिष्टा
द्वेदकर्मणो। अग्नीन्परिस्तृणाति। प्रातरग्निहोत्रं हुत्वोदितऽआदित्ये पौर्णमास्यास्तंत्रं प्रक्रमयति प्रागु
दयादमावास्यायाः कर्मणे वां देवेभ्यः शकेयं। पाणी प्रक्षाल्य। यज्ञस्य संततिरसि यज्ञस्य त्वा संततये
स्तृणाति संततस्ये त्वा यज्ञस्य। गार्हपत्यात्संततामुलपराजीं स्तृणा साहवनीयात् ऊर्ध्वं दक्षिणामुत्त
रां च दक्षिणेनाहवनीयं ब्रह्मयजमानयोः सदनं करोति। पूर्वं ब्रह्मणः परं यजमानाय। उत्तरेणाह त्रीवो
वनीयं दर्भान्संस्तीर्य द्वंद्वं पात्राणि प्रक्षाल्य न्यंचि प्रयुनक्ति। स्फ्यं च कपालानि। अग्निहोत्रहवणीं

६

रमु

शूर्पं। कृष्णाजिनं शम्यां। उलूखलं मुसलं दृषदुपलां। स्रुवं जुहूं। उपभृतं ध्रुवां। आज्यस्थाली
कुटरुं। पात्रीमेक्षणं। वेदं प्राशित्रहरणं। प्रणीताप्रणयनमिडापात्रं। एकामन्वाहार्यस्थाली
प्रातर्दोहपात्राणि। मदंती स्थालीयो चतुर्धाकरणपात्राणि। उपवेषं निष्टपनपा
त्रं। अंतर्धानकटं फलीकरणपात्रं। वेदाग्राणीध्मप्रव्रश्चनानि चासादय। अत्रासन्नयतः पवि
त्रे करोति। पूर्वेद्युः कृते सन्नयतो धारयेत्। यजमानः। भूपते भुवनपते महतो भूतस्य पते ब्रह्मा
णं त्वा वृणीमहे। ब्रह्माणं वृणीते। ब्रह्मा। अहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिर्देवे
न सवित्रा प्रसूत आर्त्विज्यं करिष्यामि देव सवितरेतं त्वा वृणते बृहस्पतिं दैव्यं ब्रह्माणं तदहं म
नसि प्रब्रवीमि मनो गायत्रियै गायत्री त्रिष्टुभे त्रिष्टुब्जगत्यै जगत्यनुष्टुभेऽनुष्टुप् बृहत्यै बृहती

पुंडे पुक्तिः प्रजापतये प्रजापतिर्विश्वेभ्योदेवेभ्यो विश्वेदेवा बृहस्पतये बृहस्पतिर्देवानां अर्स्य अहं मनुष्या
णां भूर्भुवः स्वः रतो जपति। वाचस्पतेयज्ञं गोपाय। अपरेणाहवनीयं दक्षिणातिक्रम्य। अहे दैधिष
व्यो दतस्तिष्ठान्यस्य सदने सीदयोस्मत्पाकतरः। ब्रह्मसदनात्तृणं निरस्याप उपस्पृश्य। उन्निवतत्व
दुद्वतश्चे केषं पातं माद्यावापृथिवी अद्यान्हः तस्मिन्प्राङ्मुखउपविशति। इदमहमर्वाग्वसोः सद
नेसीदामि प्रसूतो देवेन सवित्रा बृहस्पतेः सदने सीदामि तदग्नये प्रब्रवीमि तद्वायवे तत्सूर्यायेतत्पृ
थिव्ये। आहवनीयमभिमुखउपविशति। यजमानः। अपरेणाहवनीयं दक्षिणातिक्रम्य तद्वीनिर
सनादि कृत्वाखायतन उपविशति। अध्वर्युः। पवित्रे स्थो वैष्णवी वायुर्वो मनसा पुनातु। तृणं का
ष्ठं वांतर्धायाछिनत्ति नखेन। अप उपस्पृश्य। इमौ प्राणापानौ यज्ञस्यांगानि सर्वतः। आप्यायंतौ

१ (left margin, first leaf)

श्रीवे (right margin, first leaf)

१ (right margin, first leaf)

संचरतां पवित्रे हव्य शोधने अभिमंत्र्य। विष्णोर्मनसा पूते स्थः अद्भिरुन्मार्ष्टि। दक्षाय त्वा। प्रणीताप्रणयनं च
मसमादत्ते। वानस्पत्योसि देवेभ्यः शुंधस्व। वानस्पत्योसि देवेभ्यः शुंभस्व। वानस्पत्योसि देवेभ्यः शुध्यस्व
त्रिः प्रक्षालयति। अपरेण गार्हपत्यमुपविश्य। को वो गृह्णाति स वो गृह्णातु कस्मै वो गृह्णामि तस्मै वो गृह्णा
मि योषा यवः पवित्रांतर्हिते अप आनयति। अनया वो गृह्णामि पृथिव्यौ उपबिलं पूरयित्वा प्रोक्षणी
वदुसूयाभिमंत्रयते। ब्रह्मन्नपः प्रणेष्यामि यजमान वाचं यच्छ। संप्रेष्यति। ब्रह्मा। प्रणय यज्ञं देवता व
र्धय त्वा नाकस्य पृष्ठे यजमानो अस्तु। सप्तऋषीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि।
ॐ प्रणय। प्रसौति। अध्वर्युः। को वः प्रणयति स वः प्रणयतु यो देवीः प्रणयामि यज्ञं सं सादयं तु नः।
इ र मदंती घृतपृष्ठा उदाकुः सहस्रपोषं यजमाने न्यं वतीः। स्फ्येनोपयम्य समं प्राणे धारयमाणो

पृथिवीं मनसा ... (right margin, second leaf, later hand)

१०

स्कंध

दक्षिणेनाहवनीयमधिषिंचन्नहरति यजमानः। भूःस्थुकःस्थुवाक्त्रीगोष्ठ वरःवधूश्य पृश्न्ये कास्तराः
पूर्वस्त्राभाविराजोयाऽइदं विश्वं भुवनं व्यानशुः स्तानो देवीस्तरसा संविदाना स्वस्ति यज्ञं नयत प्रजानतीः प्रणी
ताः प्रणीयमाना अनुमंत्रयते। अध्वर्युः। ब्रह्मपूतास्थ को वो युनक्ति स वो युनक्तु विश्वेभ्यः कामेभ्यो देवयज्या
यै। उत्तरेणाहवनीयं दर्भेषु सादयित्वा दर्भैरपिदधाति। यजमानः। ब्रह्मपूतास्थ को वो युनक्ति स वो युनक्तु
विश्वेभ्यः कामेभ्यो देवयज्यायै साद्यमानाः। कस्त्वा युनक्ति स त्वा युनक्तु। यज्ञं युनक्ति। सर्वं विहारमनुवीक्षते
अध्वर्युः पवित्रे आदाय यथेतं प्रत्येत्य स्फ्यं पात्रैः सह निदधाति। संविशंतां देवीर्विशः पात्राणि देवयज्या
यै। सपवित्रेण पाणिना पात्राणि संमृशति। संभवतां सकृन्मंत्रः। असंभवतां मंत्रावृत्तिः। दक्षास्थिवानस्प
त्यासि। अग्निहोत्रहवणीमादत्ते तां सव्ये कृत्वा विषाय खाश्रूर्पं। प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः। आहवनी

शिवो

१०

ये गार्हपत्ये वा निष्टपति। यजमान हविर्निर्वप्स्यामि। यजमानमामंत्रयते। यजमानः ॐ निर्वपेति प्रत्याह।
अध्वर्युः उर्वंतरिक्षमन्विहि। गच्छति। अपरेणाहवनीयमपरेण गार्हपत्यं समुपविश्य व्रीहिमतीं यवमतीं वा
पात्रीं निधाय दक्षिणतः स्फ्यमुपकृष्य सर्वान् त्राककटमंत्रान् जपेत्। धूरसि धूर्व धूर्वंतं धूर्व तं योऽस्मान् धू
र्वति तं धूर्व यं वयं धूर्वामः। तस्य दक्षिणां धुरमालभ्य। त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं
देवहूतमं। सव्यामीषामालभ्य जपति। विष्णुस्त्वाक्रंस्त। सव्ये चक्रे दक्षिणं पादमादधाति। अह्रुतमसि
हविर्धानं दृंहस्व मा ह्वाः। आरोहति। मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा त्वा हिंसिषं। परि
णहं प्रेक्षते। उरु वाताय। परिणाहोद्धारमाच्छादयति। मित्रस्य त्वा० हिंसिषं पुरोडाशीयान् परिणहं व
प्रेक्षते। ऊर्जं धत्स्व। पुरोडाश्यानभिमृशति। पयो मयि धेहि। आत्मानं प्रत्यभिमृश्याप उपस्पृश्य आ

हि॰ दर्शपू॰

११

पहतꣳ रक्षः। ततस्तृणं लोष्टं वा निरस्याप उपस्पृश्य। चित्तिः स्रुक्। चित्तमाज्यं। वाग्वेदिः। आधीतं बर्हिः। केतो अग्निः। विज्ञातमग्निः। वाक्पतिर्होता। मन उपवक्ता। प्राणो हविः। सामाध्वर्युः। इत्याहोतारं व्याख्या यशूर्पे पवित्रे निधाय। यच्छं तां पंचं गोपीथाय वो नारात्यै। मुष्टिं पूरयित्वा स्फ्योप्य देवस्य त्वा स॰ भ्यामग्नये जुष्टं निर्वपामि। पवित्रांतर्हिते शूर्पे चतुरो मुष्टीन्निर्वपति त्रिर्यजुषा तूष्णीं चतुर्थं। यजमा॰ अग्निꣳ होतारमिह तꣳ हुवे देवान्यज्ञियानिह यान्हवामहे। आयंतु देवाः सुमनस्यमाना वियंतु देवा हविषो मे अस्य। हविर्निरुप्यमाणमनुमंत्रयते। अध्वर्युः। निरुप्यान्वावपति। एतेनैव कल्पेन यथादेवतमुत्तरं। इदं देवानां। निरुप्तानभिमृशति। इदमु नः सह। यतो धि निर्वपति। स्फात्यै त्वा नारात्यै। निरुप्तानेव। पुरोडाश्यानादाय। इदमहं निर्वरुणस्य पाशात्। उपभिः सर्पति। सुवरभि

११

v मान

त्रिवो

विख्येषं। सर्वं यज्ञमनुवीक्षते। वैश्वानरं ज्योतिः। आहवनीयं परेक्षते। दृꣳहंतां दुर्या द्यावापृथिव्योः प्रसव रोहति। स्वाहा द्यावापृथिवीभ्यां। स्कन्नानभिमंत्रयते। उर्वंतरिक्षमन्विहि। गच्छति। अदित्यास्त्वोपस्थे सादयामि। अपरेणाहवनीयमपरेण वा गार्हपत्यमुपसादयति। अग्ने हव्यꣳ रक्षस्व। अग्नीषोमौ हव्यꣳ रक्षेथां। इंद्राग्नी मधहव्यꣳ रक्षस्व। यथादेवतं परिददाति। सप्रस्कायाꣳ स्रुच्यपः आनीय पूर्ववदुत्पूयाभिमंत्र्य ब्रह्मन्प्रोक्षिष्यामि। ब्रह्माणमामंत्रयते। ब्रह्मा। प्रोक्षयज्ञं देवतां व धयितानाकस्य पृष्ठे यजमानो अस्तु। सप्तऋषीणा॰ धेहि। ॐ प्रोक्ष। अध्वर्युः। देवस्य त्वा॰ भ्यामग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्यां वो जुष्टं प्रोक्षामींद्राय वे मृधाय। यथादेवतं त्रिः प्रोक्षति सकृन्मंत्रेण द्विस्तूष्णीं पौर्णमास्यां। देवस्य त्वा॰ क्षामींद्राग्निभ्यां॰ अमावास्यायां उत्तानानि पात्राणि कृत्वा। शुंधध्वं॰

जपति

ज्यायै। त्रिः प्रोक्षति। प्रोक्षणीशेषमग्रेण गार्हपत्यं निदधाति। वातस्य ध्राजिरसि। कृष्णाजिनमादत्ते
अवधूतं रक्षोऽवधूता अरातयः। ऊर्ध्वग्रीवं बहिर्विवासनमुत्करे त्रिरवधुनोति। अदित्यास्त्वगसि।
अपरेणोत्करं प्रतीचीनग्रीवमुत्तरलोमोपस्तृणाति। प्रति त्वा पृथिवी वेत्तु। पुरस्तात्प्रतीचीं भसदमु
पसमस्यति। अधिषवणमसि वानस्पत्यं प्रति त्वादित्यास्त्वग्वेत्तु। अनुसृजन्कृष्णाजिनमुलूखलमधि
वर्तयति। अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि। अनुसृजन्नुलूखले हविरावपति।
त्रिर्यजुषा तूष्णीं चतुर्थं। अद्रिरसि वानस्पत्यः स इदं देवेभ्यो हव्यं सुशमि शमिष्व। मुसलमादत्ते
अवरक्षो दिवः सपत्नं वध्यासं त्रिरवहंति। हविष्कृदेहि हविष्कृदेहि त्रिः। त्रिरवघ्नन्हविष्कृदमाह्वयति उच्चैः
समाजहि। संप्रेष्यति आग्नीध्रः। अद्रिरसि श्लोककृत्। अश्मानमादत्ते तूष्णीं वा शम्यां। इषमाव शिवो

दोर्जमावद। द्युम्नवद्वदत वयं संघातं जेष्म। तेन दृषदुपले समाहंति। दृषदसि। सद्धदुपलायां त्रिः संचारय
न्नवकृत्वः संपादयति। अध्वर्युः। वर्षवृद्धमसि पुरस्तात् शूर्पमुपोहति। वर्षवृद्धा स्थ पुरोडाश्यानभिम्
शति। प्रति त्वा वर्षवृद्धं वेत्तु। उद्वपति। परापूतं रक्षः परापूता अरातयः। उत्करे त्रिर्निष्पुनाति। परा
ध्माता अमित्राः। शूर्पात्तुषानध्वंसयति पुरोडाशकपालं तुषैः पूरयित्वा। रक्षसां भागोऽसि। उत्तरा
परमवांतरदेशं अधस्तात्कृष्णाजिनस्योपवपति। नान्वीक्षते। अवबाढं रक्षः। अवबाधते। अप्र
यस्पृश्याभ्युक्ष्य कपालं निदधाति। वायुर्वो विविनक्तु। विविनक्ति। देवो वः सविता हिरण्यपाणिः प्र
तिगृह्णातु। पात्र्यां तण्डुलानवस्कंदयति। तानादायोलूखले निक्षिप्य। त्रिष्फलीकर्तवै संप्रेष्यति
अत्र वाचं विसृजते। पत्नीक्षिपयकृत्वो वहंति। अन्यस्मै प्रयच्छेत्सोत्तरुर्ध्वमवहंति। देवेभ्यः शुंधध्वं।

हि॰ दर्श॰ पू॰

१३

देवेभ्यःशुंधध्वं।देवेभ्यःशुंधध्वं।पत्नीत्रिष्फलीकरोति।अध्वर्युःसुफलीकृतान्निदधातिफलीक
रणान्प्रक्षाल्यतंडुलान्।त्रिष्फलीक्रियमाणानांयोन्योऽवशिष्यते।रक्षसांभागधेयमाप
स्तस्रवहत्वादितःस्वाहा।अंतर्वेदिप्रक्षालनंनिनयति।यजमानःरक्षोभ्यइदं।अपउपस्पृश्य।
अध्वर्युः।वातस्यध्राजिरसीत्याधृनुत्सृजन्कृष्णाजिनं।दिवस्कंभनिरसिप्रतित्वादित्यास्त्वगवेत्तु
कृष्णाजिनउदीचीनकुंबांशम्यान्निदधाति।धिषणासिपर्वत्याप्रतित्वादिवस्कंभनिर्वेत्तु।
तस्यांदृषदमधिवर्तयति।धिषणासिपार्वतेयीप्रतित्वापर्वतिर्वेत्तु।दृषदुपलां।अंशुरावच्छ
मधकमंतः।तंडुलानवेक्षते।देवस्यत्वा।ऽस्यामधिवपामिधान्यमसिधिनुहिदेवान्।दृषदितं
डुलानधिवपति।त्रिर्यजुषा।तूष्णींचतुर्थं।प्राणायत्वाप्राचीमुपलांप्रोहति।अपानायत्वाप्रतीचीं

शिवो

१३

धारयति

व्यानायत्वा।मध्यदेशेऽन्ववस्थापयति।दीर्घामनुप्रसितिमायुषेधां।प्राचीमंततःयथास्करवम
तऊर्ध्वंसंततंपिनष्टि।देवोवःसविताहिरण्यपाणिःप्रतिगृह्णातु।कृष्णाजिनेपिष्टानिप्रस्कंदयति।अदब्धे
नत्वाचक्षुषावेक्षे।अवेक्षते।आज्यविकिरंतीपिष्टंषाण्निकुरुतात्।संप्रेष्यतिप त्नीपिनष्टिदासी
वापिष्टलेयंप्रज्ञातंनिधाय।अत्रमदंतीरधिश्रयति।आहवनीयेगार्हपत्येवाहवींषिश्रपयंति।
धृष्टिरसिब्रह्मयच्छ।उपवेषमादायतेनप्रसव्यावंगारोनिर्वर्तयति।अपाग्नेऽग्निमामादंजहिनिष्क्र
व्यादंसेध।अन्यतरमुत्तरापरमवांतरदेशेऽनिरस्यापउपस्पृश्य।आदेवयजंवह।अवस्थितम
वस्थाप्य।ध्रुवमसिपृथिवींदृंहआयुर्दृंहप्रजांदृंहसजातानस्मैयजमानायपर्यूह।तस्मि
न्कपालमुपदधाति।निर्दग्धंरक्षोनिर्दग्धाअरातयः।तस्मिन्नंगारमधिवर्तयति।पत्रंमस्यं

तरिक्षं दृꣳह प्राणं दृꣳह अपानं दृꣳह सजातानस्मै यजमानाय पर्यूह। तस्मात्पूर्वं। धरुणमसि दिवं दृꣳह चक्षुर्दृꣳह श्रोत्रं दृꣳह सजा॰ तस्मात्पूर्वं। धर्मासि दिशो दृꣳह योनिं दृꣳह प्रजां दृꣳह सजा॰ दक्षिणपूर्वं। मरुतां पृꣳ त्रार्धः दक्षिणापरं। यं त्र मस्याशां दृꣳह रयिं दृꣳह पोषं दृꣳह सजाता॰ उत्तरापरं। विश्वाभ्यस्त्वाशाभ्यो छिद्रं पृꣳ सजातवनस्या॰ उपदधामि। उत्तरपूर्वं। चिदसि। अवशिष्टमुत्तरतः एकादशकपालस्य यथाष्टाकपालस्यैवं त्रीण्युपदधाति। चिदसि। तृतीयात्पूर्वं। धर्मासि दक्षिणात्पूर्वं। मरुतां पृꣳ त्रार्धः दक्षिणापरं। यं त्रम स्याशां॰ उत्तरापरं। विश्वाभ्यस्त्वाशाभ्यो॰ उपदधामि॰ उत्तरपूर्वं। चितस्थ प्रजामस्मै रयिमस्मै सजातानस्मै यजमानाय पर्यूह। मध्यमा त्रीण्युत्तरतः प्रागपवर्गं द्वादशकपालस्याप्येवं। भृगूणामंगिरसां तपसा तप्यध्वं। वेदेन कपालेष्वंगारानध्यूहति

शिवो

१४

प्रति कपालयोगं मंत्रावृत्तिः। अत्र प्रातर्दोहं दोहयति। निरुप्तमित्यादि संवप्स्यध्वमिस्यंतं। पात्रीं निष्टप्योपवातायां। देवस्य त्वा॰ भ्यांꣳ संवपामि। तिरः पवित्रं कृष्णाजिना त्संवपति पिष्टानि। त्रिर्यजुषा तूष्णीं चतुर्थं। संवपन्वाचंयच्छ सुभिवासयन्विसृजति। हुर्यौस्त्वावाराभ्यामुत्पुनामि। उदगग्राभ्यां पवित्राभ्यां पिष्टानि त्रिरुत्पूय। सकृन्मंत्रेण द्विस्तूष्णीं। स्रुवेण प्रणीतानामादाय वेदेनोपयम्य। समापोऽद्भिरग्मत समोषधयो रसेन सꣳ रेवतीर्जगतीभिर्मधुमतीर्मधुमतीभिः सृज्यध्वं। पिष्टेष्वानयति। अद्भ्यः परिप्रजाता स्थ। तप्तोदमानयति। समद्भिः पृच्यध्वं। प्रदक्षिणमनुपरिप्लावयति। जनयत्यै त्वा संयौमि। मेक्षणेन संयौति। मखस्य शिरोऽसि। पिंडं करोति। यथाभागं व्यावर्तेध्वांय यथाभागं व्यावर्तेथां। विभजति। समौ पिंडौ कृत्वा। इदमग्नये। आग्नेयमभिमृशति। इदमग्नीषो

इतरौ।

आग्नेयमभि
त्य.

ह्रिं॰दर्श॰पू॰

इद मिंद्रविवे पूधायै। इति पौर्णमास्यां।

सोमाभ्यां यथादेवतमुत्तरं इंद्रमहं सेनायाऽअभीत्वर्यैमुखमपोहामि। वेदेन दक्षिणस्मात् कपालयोगा दंगारानपोह्योत्तरस्मादपोहति। मखस्यशिरोसि। दक्षिणं पिंडमादाय। घर्मोसिविश्वायुः दक्षिणे कपालयोगे धिश्रयति एवमुत्तरं अनुगमनपूषाकृतिमश्वशफमात्रं कूर्मस्येव प्रतिकृतिं करोति उरुप्रथस्वोरुतेयज्ञपतिः प्रथतां (सर्वाणि कपालान्यभिप्रथयति) पात्र्यामप आनीयं तत्र्वंगः हीघ प्रदक्षिणमनतिक्षारयन् लेपेनानुपरिमार्ष्टि। अंतरितं रक्षोंतरिता अरातयः उल्मुकेन त्रिः पर्यग्निकरोति। देवस्त्वा सविता श्रपयतु वर्षिष्ठे अधिनाके दर्भैरभिज्वलयति। अग्निस्ते तनुवं मा तिधाग्नेहव्यं रक्षस्व। उल्मुकेः परित पति। संब्रह्मणा पृच्यस्व वेदेन सांगारं भस्माऽपोहति अविदहंतः श्रपयत संप्रेष्यति अत्रवाचं विसृजते अंगुलिप्रक्षालनं पात्रीनिर्णेजनं चोल्मु

त्रिवो

९५

केनाभितप्य अपरेणाहवनीयमपरेणवागार्हपत्यं स्फ्येनोदीचीस्तिस्रो रेखाः कृत्वा एकताय स्वाहा एकतायेदं॰ द्वितायस्वाहा। द्वितायेदं॰ त्रितायस्वाहा। त्रितायेदं॰ पश्चात् सव्यादंसे स्फ्यंदध्यौ त्रिर्निनयति।

अपरेणाहवनीयं यजमानमात्रीं वेदिं करोति यावदर्थों तिरश्चीं यजमानः इदं तस्मेहमर्यं करोमि यो वेदिं वाच्चरति ब्रह्मचर्यं। मेधावी दिक्षु मनसा तपस्यं तरदूतश्चरत्विमानुषीषु। वेदिं देवाम भिमस्त्राति। अध्वर्युः वेदेन वेदिं विविदुः पृथिवीं सापप्रथे पृथिवी पार्थिवानि। गर्भं बिभर्ति भुवनेष्वंतस्ततो यज्ञो जायते विश्वदानिः (पुरस्तात् लंबयजुषा वेदेन वेदिं त्रिः संमार्ष्टि यजमानः चतुःस्त्रिखंडा युवतिः सुपेशा घृतप्रतीका भुवनस्यमध्ये। मर्म्ज्यमाना महते सौ भगाय मह्यं धुक्ष्व यजमानाय कामान्। वेदेन वेदिं रहती मंत्रविंद सापृथिव्यां प्रथतां पा

द्वि० दर्शपू०

१८

पार्थिवासि तस्यां बर्हिः प्रथतां साध्वंतरहिं स्याणः पृथिवी देवयजन विदेन वेदिं विविदुः पृथिवीं॥
दाति: वेदिं संमृज्यमानामनुमंत्रयते अध्वर्युः देवस्यत्वा० हस्ताभ्यामाददे दर्भहूययुतं स्फ्य
मादाय इंद्रस्य बाहुरसि दक्षिणः। अभिमंत्रयते। सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजाः
तस्य दर्भेनाग्रमुन्मार्ष्टि। दर्भैरिरस्यापउपस्पृश्य। पृथिव्यै वर्मासि। पूर्वार्धे वेदेर्वितृतीयदेशे
प्रागग्रमुदगग्रं वा दर्भं निदधाति। पृथिवि देवयजन्योषध्यास्ते मूलं माहिंसिषं। तस्मिन्स्फ्ये
न प्रहरति। अपउपस्पृश्य। अपहतोररुः पृथिव्यै स्फ्येन सत्त्वानाभ्यां स्तूनपाददीत। व्रजं गच्छ
गोस्थानं हरति। यजमानः। यो मा हृदा मनसा यश्च वाचा यो ब्रह्मणा कर्मणा द्वेष्टि देवाः। यः
श्रुतेन हृदयेनेष्छता वा न तस्येंद्रवज्रेण शिरश्छिनद्मि। स्तंबयजुः ह्रियमाणमनुमंत्रयते। अध्व

शिवो

१८

र्युः। वर्षवृत्ते द्यौः। वेदिं प्रतीक्षते। वर्षवृत्ते पर्जन्यः। यजमाने। आग्नीध्रः। नमो दिवे नमः पृथिव्यै। उत्तर
तउत्तानो हस्तो कृत्वोपविशति प्रक्रमे वेदेः। अध्वर्युः। बधान देव सवितः परमस्यां परावति शतेन पा
शैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्। तस्मा उपनिवपति। आग्नीध्रः। अवबाढो दुरस्युः।
अभिगृह्णा सांजलिना परिगृह्यास्ते। अध्वर्युः। मा वः शिवा ओषधयो मूलं हिंसिषं। द्वितीयं प्रहरति। ५
अपउपस्पृश्य। अपहतोररुः पृथिव्यै देवयजन्यै द्वितीयमादत्ते व्रजं गच्छ गोस्थानमित्यादि पूर्ववत्।
आग्नीध्रः। अवबाढो देवयजन्या यातुधानाः। द्वितीयमभिगृह्णाति। अध्वर्युः। द्रप्सस्ते दिवं मा स्क
न्। तृतीयं प्रहरति। अपउपस्पृश्य। अपहतोररुः पृथिव्या अदेवयजनः। तृतीयमादत्ते। व्रजं
च्छेत्यादि पूर्ववत्। आग्नीध्रः। अवबाढो घशंसः। तृतीयमभिगृह्णाति। अध्वर्युः। तं छींन्चतुर्थं

१७

ष्ट्रन्सर्वैर्दर्भैः शीर्षं निदधाति आग्नीध्रः अररुस्ते दिवं मास्कान् चतुर्थमभिगृह्णाति। अध्वर्युः स्फ्ये
न वेदिं परिगृह्णाति। वसवस्त्वा परिगृह्णंतु गायत्रेण छंदसा दक्षिणतः प्राचीं लेखां लिखति। रु
द्रास्त्वा परिगृह्णंतु त्रैष्टुभेन छंदसा। अथ उपस्तरस्य पश्चादुदीचीं। आदित्यास्त्वा परिगृह्णंतु जा
गतेन छंदसा। उत्तरतः प्राचीं। यजमानः। बृहस्पते परिगृहाण वेदिं स्वगा वो देवाः सदनानि
संतु तस्यां बर्हिः प्रथतां साध्वंतर्हितः त्वाणः पृथिवी देव्यस्तु जपति। अध्वर्युः। प्राचो वेद्यं
सा उन्नयत्युभितः आहवनीयं प्रतीची श्रोणी। अभिगार्हपत्यं मध्ये सन्नतरा भवति।
इमां नराः कृणुत वेदिमेत्य वसुमतीं रुद्रवतीमादित्यवतीं वर्ष्मन्दिवो नाभा पृथिव्या यथा
यं यजमानो न रिष्याद् इति तद्देवेभ्यो जुष्टामदित्या उपस्थ इमां देवा अजुषंत सर्वे रायस्पोषं प

२

शिवो

१७

जमानं विशंतु। संप्रेष्यति। आग्नीध्रः। अपहतो ररुः पृथिव्या आरे देवयजं वह। स्फ्येनोत्तमां त्वचमुद्ध
स्योत्करे निवपति यजमानः यद्द्धं तो जिहिंसिम पृथिवीमोषधीरपः। अध्वर्युर्वस्फ्यकृत स्फ्येना
तरिक्षं मा रूपाचत स्मात्तु। यद्द्धं तो जहिंसिम जीवमस्या वेदिं चकृमा मनसो देवयंतः
मा तेन हेउ उपगाम भूम्याः शिवा नो विश्वैर्भुवनेभिरस्तु। स्फ्येनोत्तमां त्वचमुद्धन्यमानां। आग्नीध्रः
देवस्य सवितुः सवे कर्म कृण्वंति वेधसः। खनति अप उपस्तरस्य। अध्वर्युः। ब्रह्मन्नुत्तरं परिग्राहं
परिग्रहीष्यामि। ब्रह्माणमामंत्रयते। ब्रह्मा। बृहस्पते परिगृहाण। व्यस्तु द वता वर्धयितान। धेहि।
ॐ परिगृहाण। अध्वर्युः। ऋतमसि दक्षिणतः। ऋतसदनमसि पश्चात्। ऋतश्रीरसि उत्तरतः
बृहस्पते परिगृहाण वेदिमिति यजमानः। अध्वर्युः। धात्रासि स्वधा अस्कवरी वासि वस्वी वासि

स्फ्येन प्रतीचीं संमार्ष्टि । यजमानः । भूमिर्भूत्वा महिमानं पुपोष ततो देवी वर्धते पयांसि यज्ञियायज्ञं
वि वयंति रोषधीरापरुहस्त्राधकेरीश्वा । कृतानुमंत्रयते । अध्वर्युः । पुराक्रूरस्य विसृपो विरप्शि

न्नुदादाय पृथिवीं जीरदानुर्यामैरयं चंद्रमसि स्वधाभिस्तां धीरासो अनुदृश्य यजंते । अभिमं
त्र्यापश्चार्धे वेदेर्वितृतीयदेशे स्फ्यं तिर्यंचं धृत्वा संप्रेष्यमाह । प्रोक्षणीरासादयेध्माबर्हि
रुपसादय स्रुवं च स्रुचश्च संमृड्ढि पत्नीं संनह्याज्येनोदेहि । संप्रेष्यति । आग्नीध्रः ।
अग्निहोत्रहवण्यां पवित्रांतर्हितायामप आनीयोदंचं स्फ्यमुपरिष्टादंतर्वेदि धारयन्स्फ्यस्य
वर्त्मन्नुपनीय । ऋतसधस्थ । स्फ्यपदे सादयति । यजमानः । ईडेन्यक्रतूरहमपो देवी शिवो
रुपब्रुवे दिवा नक्तं च सस्रुषीरपस्वरीः । प्रोक्षणीरासाद्यमानाः । आग्नीध्रः । शतभृष्टिरसि

वानस्पत्यो द्विषतो वधः । उत्करे स्फ्यमुदस्यति । पुरस्तात्प्रत्यंचं स्तंबविमतं उपोहति । हस्ताववनेनि
क्ते । स्फ्यं प्रक्षालयति । नाग्रं परिमृशति । उत्तरेण प्रणीता इध्माबर्हिरुपसादयति । दक्षिणमिध्मं
उत्तरं बर्हिः । वेदप्रांते स्रुवं च स्रुचश्च सह संमार्ष्टि । अग्निशितास्थ सपत्नक्षयणीः । अभिमंत्र्या
घृताचीरिताग्निर्वो ह्वयति देवयज्यायै । आदाय प्रस्कष्टं रक्षः प्रस्कष्टा अरातयो अग्नेर्वस्तेजि
ष्ठेन तेजसा निष्टपामि । आहवनीये गार्हपत्ये वा निष्टपति । गोष्ठं मा निर्मृक्षं वाजिनं त्वा सपत्नसा
हं सम्मार्ज्मि । स्रुवमग्रेरंतरतोभ्याकारं सर्वतो बिलमभिसंमार्ष्टि मूले दंडं । वाचं प्राणं मा
निर्मृक्षं वाजजिनीं त्वा सपत्नसाहीं सम्मार्ज्मि । जुहूं प्राचीमग्रे रंतरतोभ्याकारं प्रतीचीं मध्ये
बाह्यतो मूले दंडं । चक्षुः श्रोत्रं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीं सम्मार्ज्मि । उपभृतं प्रती

हि॰ दर्श॰पू॰

चीमग्नेरंतरतोभ्याकारं प्राचीमध्ये बोधतो मूले देहं। प्रजां योनिं मा निर्मृक्षं॰ यथोक्तचमेवं क्रवा। न संमृष्टा
वासंमृष्टां चमसं सृजति। घृताचीरेता अग्निर्वो ह्वयति देवयज्यायै आद्या। प्रसृष्टं रक्षः॰ निरस्य प्रोक्ष्या
ग्रेणोत्करं दर्भेषु सादयति॰ दर्भैरपिदधाति। प्राशित्रहरणं तद्धी निरस्य। अन्नाद्यं प्रजां पुष्टिं मा निर्मृ
क्षं वा। अस्तो सपत्नसाहं संमार्ज्मि। सर्वतो बिलमभिसंमार्ष्टि मूले देहं (पुनर्निरस्यति) स्रुक्संमा
र्जनान्यस्युक्ष्य। दिवः शिल्पमवततं पृथिव्याः ककुभिः श्रितं तेन वयं सहस्रवल्केन सपत्नं नाश
याम सि स्वाहा। अग्नावादधाति। यजमानः प्रजापतयइदं॰ आग्नीध्रः वेदमाज्यस्थाली यत्कृपवि
त्रं वाद्याय। आत्रा सो नासो मनसं प्रजां सौभाग्यं तनूं। अग्नेरनुव्रता भूत्वा सन्नह्ये सुकृताय कं। सो
जेन योक्त्रेण पत्नीं संनह्यति। पूषा ते ग्रंथिं ग्रथ्नातु। उत्तरतो नाभेर्निष्टर्क्यं ग्रंथिं कृत्वा। स ते मास्थात् शिवो

११ जघनेन वा

११

दक्षिणतो नाभेः कर्षयति अग्ने गृहपत उपमाह्वयस्व पत्नी गार्हपत्यमुपतिष्ठते देवानां पत्नीरुपमाह्व
यध्वं: अपरेण गार्हपत्यं देवपत्नीः पत्नि पत्नेषते लोको नमस्ते अस्तु माहिंसीः तमेवदेशं प्रेक्षते
इंद्राणीवा विधवा भूयासमदितिरिव सुपुत्रा अस्थूरित्वा गार्हपत्योपनिषदे सुप्रजास्त्वाय दक्षि
णतः पश्चाद्गार्हपत्यस्योदीच्युपविशति। सुप्रजसस्त्वा वयं सुपत्नीरुपसेदिम अग्ने सपत्नदंभ
नमदब्धासो अदाभ्यं मम पुत्राः शत्रुहणो थो मे दुहिता विराट् उताहमस्मि संजया पत्यौ मे श्लोक
उत्तमः आसीना जयति। आग्नीध्रः पूषा ते बिलं विष्यतु। सपिधानस्य गर्गरस्य बिलं वा विष्य
ति अन्यस्मिन्पात्रे निषिच्य। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं। समूढमस्य पांसुरे। दक्षिणा
ग्नावधिश्रित्य अदितिरस्यनाछिन्नपवित्रा। आज्यस्थालीमादाय। महीनां पयोस्योषधीनां रस

मा

हिं० दर्श पू०

२०

संस्रस्य तेक्षीयमाणस्य निर्वपामि देवयज्यायै। पवित्रवत्यामाज्यस्थाल्यां प्रभृतमाज्यं निर्वपति किंचिद्धि
कं इषे त्वा। दक्षिणार्धे गार्हपत्यस्यांगारेष्वधिश्रयति। ऊर्जे त्वा अपादाय वेदेनोपयम्य पत्न्या उपनिदधा
ति। महीनां पयोस्योषधीनां रसोदब्धेन त्वा चक्षुषावेक्षे सुप्रजास्त्वाय। तत्सा निमील्यानुद्धृ संस
वेक्षते। तेजोसि उत्तरार्धे गार्हपत्यस्याधिश्रयति। तेजसे त्वा अपादाय। तेजोनुप्रेहि। दक्षिणेनाह
वनीयं हरति। अग्निस्ते तेजो मा विनैत् आहवनीये धिश्रयति। तूष्णीमादाय यथेतं प्रत्येत्य। अ
ग्नेर्जिह्वासि सुभूर्देवानां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे भव उत्तरेण प्रोक्षणी स्फ्यस्य वर्त्मन्
सादयति। आज्यमसि सत्यमसि सत्यस्याध्यक्षमसि हविरसि वैश्वानरं वैश्वदेवमुत्पूत शुष्म
ं सत्योजाः सहोसि सहमानमसि सहस्वारातीः सहस्वारातीयतः सहस्व पृतनाः सहस्व पृत

त्रिवो

२०

न्यतः सहस्रवीर्यमसि तन्माजिन्वाज्यस्याज्यमसि सत्यस्य सत्यमसि सत्यायुरसि सत्यशुष्ममसि सत्येन त्वाभि
घारयामि तस्य ते भक्षीय। निमील्यानुद्धृत्य संवेक्षते ध्वर्यु यजमानश्च। अध्वर्युः। शुक्रमसि ज्योतिरसि तेजो
सि उदगग्राभ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पुनाति। देवो वः सविता इति त्रिः प्रोक्षणीः। यजमानः अ
द्भिराज्यमाज्येनापः सम्यक्पुनीत सवितुः पवित्रैः। ता देवीः शाक्वरीः शाक्वरे येमं यज्ञमवत संविदानाः। आ
ज्यमापश्चोत्पूयमाना। अध्वर्युः। अंतर्वेद्याज्यानि गृह्णाति स्रुवेणाभिघ्नन्नाभिनावेदेनोपयम्योपबिलं स्था
ल्या जुहूं धारयमाणः। शुक्रं त्वा शुक्रायां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि। ज्योतिस्त्वा ज्योतिषि
धाम्ने० मि। अर्चिस्त्वार्चिषि धाम्ने० मि। पंचानां त्वा वातानां यंत्राय धर्त्राय गृह्णामि। चतुर्जुह्वां भूयिष्ठं।
यजमानः पंचानां त्वा वातानां चतुः रुत्वो भिमंत्रयते। अध्वर्युः। मध्यदेशे उपभृतं धारयमाणः। पंचानां

हि॰ द्र॰ प॰

२१

लर्तूनां॰ भि। पंचानां त्वा दिशां॰ भि। पंचानां त्वा पंचजनानां॰ चरोस्त्वा पंचबिलस्य॰ ब्रह्मणस्त्वा तेजसे॰ क्षत्रस्य
त्वौजसे॰ विशे त्वा॰ सुवीर्याय त्वा गृह्णामि। अष्टावल्पिष्ठमुपभृति। यजमानोप्येतैरेवानुमंत्रयते। अध्व
र्युः भूमौ प्रतिष्ठितायां ध्रुवायां। सुप्रजास्त्वाय त्वा गृह्णामि। रायस्पोषाय त्वा गृह्णामि। ब्रह्मवर्चसाय त्वा॰
भूरस्माकं हविर्देवानामाशिषो यजमानस्य देवानां त्वा देवताभ्यो गृह्णामि। भूयिष्ठं ध्रुवायां। यजमा
नोप्येतैरेवानुमंत्रयते। अन्यत्रोत्करादाज्यानि सादयित्वा पोधृत्याज्यस्थाली स्कंदेवेदाभ्यां सह। आ
पो देवीरग्रेपु॰ प्रोक्षितास्थ। प्रोक्षणीरभिमंत्र्य। ब्रह्मन्प्रोक्षिष्यामि ब्रह्माणमामंत्रयते। ब्रह्मा। प्रोक्षय॰
ॐ प्रोक्षा। कृष्णोस्याखरेष्ठोग्नये त्वा स्वाहा। विषायेध्मं त्रिः प्रोक्षति। वेदिरसि बर्हिषे त्वा स्वाहा। त्रिर्वेदिं।
बर्हिरसि स्रुग्भ्यस्त्वा स्वाहा। त्रिर्बर्हिः। अंतर्वेदि पुरोग्रंथिं बर्हिरासाद्य। यजमानः। अदितिस्त्रेम बर्हि

श्रीवो

२१

रंतः पृथिव्याः संरोहयंतु ओषधीर्वि रक्षणाः। यासां मूलमुद्वधीः स्फेन त्रिवानस्ताः सुहवा भवंतु बर्हि
रासाद्यमानं अध्वर्युः दिवे त्वा अग्राणि प्रोक्षति। अंतरिक्षाय त्वा मध्यानि पृथिव्यै त्वा मूलानि यजमानः
सुमनसो यजमानाय संत्वोषधीरापरहत्ताकरीश्च। वृष्टिर्द्यावापर्जन्य एना विरोहयतु हिरण्यवर्णाः शु
तवल्शा अदब्धाः बर्हिः प्रोक्ष्यमाणं अध्वर्युः सुच्यग्राण्युपपाद्य मूलान्युपपादयति। पोषायवः
सह स्रुचा पुरस्तात्संस्नं ग्रंथिं प्रस्कृक्षति स्वधा पितृभ्य ऊर्भव बर्हिषद्भ्य ऊर्जा पृथिवीं गच्छत। प्रो
क्षण्यवशेषं निनयति दक्षिणस्याः श्रोणेरुत्तरस्याः। यजमानः पितृभ्यो बर्हिषद्भ्य इदं॰। अपउपस्पृ
अध्वर्युः। पूषा ते ग्रंथिं विष्यतु बर्हिषो ग्रंथिं विष्यति। विष्णोस्तूपोसि। पुरस्तात्प्रस्तरं गृह्णाति
कर्ष निवापयच्छति यजमाने प्राणापानौ दधामि प्रस्तरे पवित्रे अपिसृज्य। प्राणापानाभ्यां त्वा

हि॰ द॰ पू॰

२२

सततुं करोमि ब्रह्मणे प्रयच्छति ब्रह्मा यजमानाय यजमानो धारयन्नास्ते अध्वर्युः तृणे वेदिमंतर्धायास्ना
याशुल्बं ऽस्तृणाति देवबर्हिरूर्णाम्रदसं त्वास्तृणामि स्वासस्थं देवेभ्यः। अग्रेः मूलान्याच्छादयन्
बर्हिषा वेदिं ऽस्तृणाति पश्चात्सम्यात्रिधातु पंचधातु वा धातौ धातौ मंत्रमावर्तयते यजमानः ऊर्णा
म्रदुप्रथमानं ऽस्योनं देवेभ्यो जुष्टं ऽसदनाय बर्हिः स्वर्गे लोके यजमानं धेहि मां नाकस्य पृष्ठे प
रमे व्योमन् बर्हिस्तीर्यमाणं धातौ धातौ मंत्रः चतुःशिखंडा युवतिः सुपेशा घृतप्रतीका वयुनानि व
स्ते। सा स्तीर्यमाणा महते सौभगाय सा मे धुक्ष्व यजमानाय कामान्। मध्यमधातौ द्वितीयो मंत्रः वे
दिं परिस्तीर्यमाणं शिवा च मे शग्मा चैधि स्योना च मे सुषदा चैधि ऊर्जस्वती च मे पयस्वती चैधि स्व
प चरणा च मे स्वधिचरणा चैधीषमूर्जं मे पिन्वस्व ब्रह्म तेजो मे पिन्वस्व क्षत्रमोजो मे पिन्वस्व विशं

दि

शिवो

२२

पुष्टिं मे पिन्वस्वायुरन्नाद्यं मे पिन्वस्व प्रजां पशून्मे पिन्वस्व अध्वर्युः अनूयाजार्थं उल्मुके उदूह्याहवनीयं
कल्पयित्वा प्रस्तरादाय प्रस्तरं परिधीन्परिधौ दधाति गंधर्वोसि विश्वावसुः विश्वस्मादीषतो यजमानस्य प
रिधिरिड ईडितः अपरेणाहवनीयं बर्हिष्युदगग्रं मध्यमं यजमानः अस्मिन्यज्ञ उप भूय इन्नु मे विश्वा
माय परिधीन्दधामि धर्ता धरुणो धरीयानग्निर्द्वेषांऽसि निरितो नुदातै ध्रुवोसि ध्रुवोहं ऽसजातेषु
भूयासं धीरश्चेत्ता वसुवित् मध्यमं। अध्वर्युः। इंद्रस्य बाहुरसि दक्षिणो यजमानस्य परिधिरिड ईडि
तः दक्षिणार्धे सं ऽस्पृष्टं मध्यमेनाभ्ययं। यजमानः। अस्मिन्यज्ञ उग्रोस्युग्रोहं ऽसजातेषु भूयासमुग्र
श्चेत्ता वसुवित् युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः इंधानास्त्वा सुप्रजसः सुवीरा
ज्योग्जीवेम बलिहृतो वयं ते। यन्मे अग्ने अस्य यज्ञस्य रिष्याद्यद्वा स्कंदादाज्यस्योत विष्णो। तेन हन्मि

सपत्नं दुर्मरायुमेनं दधामि निर्ऋत्या उपस्थे अग्निं परिधानीयं अध्वर्युः मित्रावरुणौ त्वोत्तरतः प
रिधत्तां ध्रुवेण धर्मणा यजमानस्य परिधिरिड ईडितः उत्तरार्धं संस्पृष्टं मध्यमेनाभ्यग्रं यज
मानः असिमन्यज्जुपभूयद्र० अभिभूरस्य भिभूरहं सजातेषु भूयासमभिभूश्चेत्तावस्कवित्
अध्वर्युः सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्याः आहवनीयमभिमृश्य यजमानः। ते
जिष्ठा ते तपनी या चरा च नाप्रयोषं ती स्तनुवो यास्ते अग्ने नाभिर्वर्माण्यभितो व्ययस्त्वमा
ताद्भन्यालुधानुः पित्राचाः परिधत्तं अध्वर्युः ऊर्ध्वे आघारसमिधावादधाति वी

तिहोत्रं त्वा कवे द्युमंतं समिधीमह्यग्ने बृहंतमध्वरे दक्षिणां तूष्णीमुत्तरां समावनं सर्गभौ दर्भौ वर्हि
षो विधृती कुरुते विश्रोथं त्रेस्थः मध्ये वेदेर्वीहि प्रुदीचीनाग्रे निदधाति यजमानः विच्छिन्नाग्रे विधृ
तीभ्यां सपत्नान्जाततान्धात्त व्यान्ये वजनिष्यमाणाः विश्रोयं त्राभ्यां विधमाम्येनानहं स्वाना
सुत्तमो मा निदिवाः विश्रोपंत्रे नुदमाने अरातिं विश्वं पाप्मानममतिं दुर्मरायं सीदंतीदेवी सुकृत
स्य लोके धृती स्थो विधृती स्वधृती प्राणान्मयि धारयतं प्रजां मयि धारयतं पशून्मयि धारयतं
विधृती रासाद्यमाने अध्वर्युः वसूनां रुद्राणामादित्यानां सदसि सीद तयोः प्रस्तरं साद
यति यज० अयं प्रस्तर उभयस्य धर्ता धर्ता प्रयाजानामुतानूयाजानां सदाधारसमिधो वि
श्वरूपा स्तस्मिन्न्ममाबो अध्यासादयामि प्रस्तरं अध्वर्युः जुहूरसि घृताचीनाम्ना प्रियेण ना

हि०दर्शपू०

२४

म्ना प्रियेसदसिसीद। प्रस्तरे जुहूं सादयति। आरोहपृथो जुहूदेवयानान्यत्र ऋषयः प्रथमजायेपुराणाः। हि
रण्यपक्षाजिरा संभृतांगा वहासिमा सुकृतां यत्रलोकाः। जुहूरसिघृताची गायत्रियाग्नी कुविभिर्जु
ष्टाणा अव्यथमानायज्ञमनुयच्छस्वसुनीती यज्ञं नयास्फ पदे वानाग्नेयेनत्रामीणादैव्येन जुहूं
अध्वर्युः उपभृदसिघृताची० सीदाउत्तरामुपभृतमधस्ताद्धिषस्यो प्रतिकुष्टतरां। यजमानः
अवाहं बाधउपभृतासपत्नान्जातांन्भ्रातृव्यान्येवजाने ष्यमाणाः दोहै यज्ञं सुदुघामिवधेनुम
हमुत्तरोभूयासमधरेमत्सपत्नाः। सुभृदस्यपभृदूत्ता वैत्रैष्टुभेनछंदसा विश्वेदेवैः अव्यथमा

शिवो
२४

नायज्ञमनुयच्छस्व सुकनीयुती यज्ञंनयास्फपदेवान्नैंद्रेणत्रामीणादैव्येन उपभृतं अध्वर्युः ध्रुवासिघृताचीना०
सीद। ध्रुवामुपरिष्टाद्विषस्योः यजमानः योमावाचामनसादुर्मराय्युहृदारातीयादभिदासदग्ने इदमस्यचि
त्तमधरं ध्रुवायाअहमुत्तरोभूयासमधरेमत्सपत्नाः ध्रुवासिधरणीधनस्यपूर्णाजागतेनछंदसाविश्व
वेदैः अव्यथमानायज्ञमनुयच्छस्वसुकनीतयज्ञंनयास्फपदेवान्वैश्वदेवेनत्रामीणादैव्येन ध्रुवां अध्व
र्युः ऋषभोसिशाक्वरोवषट्कारस्यत्वामात्रायां सादयामि दक्षिणेनजुहूं ध्रुवांवोत्तरेण यजमानः स्यो
नामेसीदसुषदः पृथिव्यां प्रथयिप्रजयापुरभिः स्वर्गेलोके दिविसीदपृथिव्यांतरिक्षिहमुत्तरोभूया
समधरेमत्सपत्नाः अयं स्रुवो अभिजिहर्ति होमान्शतक्षरः छंदसानुष्टुभेन सर्वायज्ञस्यसमन
क्तुधिष्णाबार्हस्पत्येनत्रामीणादैव्येन अध्वर्युः यथावकाशमाज्यस्थालीं यजमानः इयं स्थालीघृतस्य

पात्रिपुत्तपर्शते

२५ पूर्णा छिन्नपयाः शत धारउत्सः मारुतेन शर्मणा दैव्येन आज्यस्थाली अध्वर्युः एतान् असदन्सु
कृतस्य लोके तान्विष्णो पाहि पाहि यज्ञं पाहि मां यज्ञनियं स्रुचो ऽभिमंत्रयते विष्णूनि स्थ वैष्णवानि
धामानि प्राजापत्यानि। स्रुग्गतान्याज्यानि। सस्रुवामाज्यस्थालीं वेदं पात्रीं चादाय। इदमहं सेनाया अ
भीत्वर्या मुखमपोहामि वेदेन दक्षिणस्मात्पुरोडाशादंगारानपोह्योत्तरस्मादपोहति सूर्यज्योतिर्विभा
हि महत इंद्रियाय अभिमंत्रयते स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि पात्र्यां प्र
त्तिपुरोडाशमुपस्तीर्य आप्यायतां घृतयोनिरग्निर्हव्यानुमन्यतां खमंक्ष्व त्वचमंक्ष्व सुरूपं त्वाव
सुविदं पशूनां तेजसाग्नये जुष्टमभिघारयामि आग्नेयमभिघारयति। तूष्णीमितरं। यस्त आ
त्मा पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे। आत्मन्वान्सोम घृतवान्हि भूत्वा देवान्गच्छ स्व २५

र्विदं यजमानाय मह्यं शृतं आर्द्रः प्रथस्नुर्भुवनस्य गोपाः शृत उत्स्नाति जनिता मतीनां पुरोडा
शमुद्वासयति अभिं दन्नपर्यावर्तयन्वेदेन भस्म प्रमृज्य तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध मि
सुमनस्यमानः उपस्तीर्णे पात्र्यां निदधाति एवमुत्तरं दृंह गाढं दृंह। रिषतः शृतमुद्वासयति
द्वाराभृतिः पृथिव्येरसोमोत्क्रमीत् एके करा कपालान्यभिघार्य संख्यायोद्वासयति देवस्त्वा सवि
ता मध्वानक्तु पुरोडाशमनक्ति उपरिष्टादभ्यज्य स्रुवेण हस्तेनाधस्तादुपानक्ति प्रियेण नाम्ना
२६ प्रियं सद आसीदेतां अपरेण स्रुचः पुरोडाशावासादयति मध्ये वेदेः सान्नाय्यकुंभ्यो सं
धाय व्यूहति दक्षिणस्यां श्रोण्यां शृतमुत्तरस्यां दधि यजमानः यस्त आत्मा सान्नाय्य आ
साद्यमाने यत्तो ऽभिसर्वतः श्रितः सर्वतो मां भूतं भविष्यच्छ्रयतां शतं मे संत्वाशिषः सहस्रं

हि० दर्शपू०

२६

मे संतु सूनृता इरावतीः पशुमतीः आग्नेयमासन्नमभिमंत्रयते हस्तेनारभ्य मंत्रवचनं
प्रजापतिरसि सर्वतःश्रितः सर्वतो मां भूतं भविष्यच्छ्रयतां अग्नीषोमीयं यो नः कनीयद्
ह कामयातां अस्मिन्यज्ञे यजमानाय मह्यं अपनुदमिंद्रो वैमृधो भुवनान्नुदतां महं प्रजां
वीरवतीं विदेय ऐंद्रं वैमृधं यो नः कनीय० अपनुदमिंद्राग्नी भुवनान्नुदेतां महं प्रजां वीर
वतीं विदेय ऐंद्राग्नं इदमिंद्रियममृतं वीर्यमनेनेंद्राय पशवोऽचिकित्सन् तेन देवा अवत
प माभिहेषमूर्जयन्तः सह ओजसे नयः श्रितं मधिश्रयतां शृतं यत्पृथिवीमचरत्तस्य
विष्टं येनासिंचद्बलमिंद्रे प्रजापतिः इदं तच्छुक्रं मधुवाजिनीवद्येनोपरिष्टादधिनोन्महें
द्रं दधि मां धिनोतु इति अयं यज्ञः समसदद्धविष्मान्नृचासाम्नायजुषादेवताभिः ते

शिवो

२६

न लोकान्सूर्यवतो जयेमेंद्रस्य सख्यममृतत्वमश्यां। संसन्नान्यभिमृशति। ममाग्ने वर्चो विहवे० तनुवा सू
वीराः। मह्यं यजंतु मम यानि हव्याकूतिः सत्या मनसो मे अस्तु। एनो मा नि गां कतमच्चनाहं विश्वे देवासो अ
धिवोचता मे देवीः षडुर्वीरुरुणः कृणोत विश्वे देवास इह वीरयध्वं। माहास्महि प्रजया मा तनूभिर्मा र
धाम द्विषते सोम राजन्। अग्निर्मन्युं प्रतिनुदन्पुरस्तादृब्धो गोपाः परिपाहि नस्त्वं। प्रत्यंचो यंतु निगु
तः पुनस्ते मैषां चित्तं प्रबुधा विनेशत्। धाता धातॄणां भुवनस्य यस्पतिर्देवं सवितारमभिमातिषाहं।
इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पांतु यजमानं न्यर्थात्। उरुव्यचा नो महिषः शर्म यंसदस्मिन्हवे
पुरुहूतः पुरुक्षु। स नः प्रजायै हर्यश्व मृडय इंद्र मा नो रीरिषो मा परादाः। पृथिवी होता द्यौरध्वर्युः।
रुद्रोऽग्नीत् बृहस्पतिरुपवक्ता। पौर्णमास्यां हवींष्यासन्नान्यभिमृशति। अग्निर्होता अश्विनाध्वर्यू।

कृ० दर्शपू०

२७

स्तृणीत । मित्रऊपवक्ता यं स्होत्रैवामावास्यायां । अध्वर्युः । अयं वेदः पृथिवीमन्वविंदद्गुहासतीं गहने गह्वरेषु स विंदतु यजमानाय लोकमछिद्रं यज्ञं भूरिकर्मा करोतु । अग्रेण ध्रुवां वेदं निधाय वेद्यंतान्परिस्तीर्य होतृषदनं कल्पयति । होतेर ३ हि । इध्मादेकां समिधमादाय अग्नये समिध्यमानायानुब्रू ३ हि । संप्रेष्यति यजमानः दशहोतारं पुरस्तात्सामिधेनीनां व्याचक्षीत । अंगिरसोमास्य यज्ञस्य प्रातरनुवाकैरवंतु अनूच्यमानासु सामिधेनीषु जपति । अध्वर्युः । आसीनः प्रणवे प्रणवे समिधमादधाति समिधो अग्न आहुते स्वस्या मनूयाज समिधमवशिष्य सर्वमिध्ममादधाति । यजमानः समिधो अग्निराहुतः स्वाहाकृतः पिपर्तु नः स्वगा देवेभ्य इदं नमः ३ खुषो अग्ने यजमानायेधि निखुषो अभिदासतः । अग्ने देवेध्ममन्विध मंद्रजिह्वामर्त्यस्य ते होतर्मूर्धन्नाजिघर्मि रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ।

श्रौ

२८

समिधमग्निं देवाः पितरः पितरो देवा योहमस्मि स सन्यजे यस्यास्मि न तमंतरेमि स्वं म इष्टं स्वं दत्तं स्वं पूर्तं स्वं श्रांतं स्वं हुतं तस्य मेग्निरुपद्रष्टा वायुरुपश्रोतादित्योनुख्याता द्यौः पिता पृथिवी माता प्रजापतिर्बंधुर्य एवास्मि स सन्यजे यस्यास्मि न तमंतरेमि होतृप्रवरे जपति अध्वर्युः ॐ दासद्देवत्तास्फ वेदेनाहवनीयं त्रिरुपवाज्य स्रुवेण ध्रुवाया आज्यमादाय वेदेनोपयम्यो त्तरं परिधिसंधिमन्ववहृत्य स्रुवं प्रजापतये मनवे स्वाहा मनसाध्यायन्दक्षिणा प्रांचमृजुं संततं जुहोति ज्योतिष्मत्साधारयति सर्वाणी ध्मकाष्ठानि संस्पर्शयति यजमानः प्रजापतये मनव इदं मनोसि प्राजापत्यं मनसा मा भूतेनाविश स्रुवाघारमनुमंत्रयेत अध्वर्युः स्रुवेणाज्यस्थाल्या आज्यमादाय आप्यायतां ध्रुवा घृतेन यज्ञं यज्ञं प्रति देवयद्भ्यः सूर्याया ऊधोदित्या उपस्थ उरुधा

